# Mantrasiddhiprada Mahadurga ShatanAma Stotram

# मन्त्रसिद्धिप्रदमहादुर्गाशतनामस्तोत्रम्

## Document Information

Text title : mantrasiddhipradamahAdurgAshatanAmastotram

File name : mantrasiddhipradamahAdurgAShTottarashatanAmastotram.itx

Category : devii, aShTottarashatanAma, durgA, devI

Location : doc_devii

Proofread by : NA

Description/comments : See corresponding Namavali

Source : Mundamala Tantra paTala 4 shlokAH 10-24

Latest update : January 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2021

*sanskritdocuments.org*

# मन्त्रसिद्धिप्रदमहादुर्गाशतनामस्तोत्रम्

ॐ दुर्गा भवानी देवेशी विश्वनाथप्रिया शिवा ।
घोरदंष्ट्राकरालास्या मुण्डमालाविभूषिता ॥ १॥

रुद्राणी तारिणी तारा माहेशी भववल्लभा ।
नारायणी जगद्धात्री महादेवप्रिया जया ॥ २॥

विजया च जयाराध्या शर्वाणी हरवल्लभा ।
असिता चाणिमादेवी लघिमा गरिमा तथा ॥ ३॥

महेशशक्तिर्विश्वेशी गौरी पर्वतनन्दिनी ।
नित्या च निष्कलङ्का च निरीहा नित्यनूतना ॥ ४॥

रक्ता रक्तमुखी वाणी वस्तुयुक्तासमप्रभा ।
यशोदा राधिका चण्डी द्रौपदी रुक्मिणी तथा ॥ ५॥

गुहप्रिया गुहरता गुहवंशविलासिनी ।
गणेशजननी माता विश्वरूपा च जाह्नवी ॥ ६॥

गङ्गा काली च काशी च भैरवी भुवनेश्वरी ।
निर्मला च सुगन्धा च देवकी देवपूजिता ॥ ७॥

दक्षजा दक्षिणा दक्षा दक्षयज्ञविनाशिनी ।
सुशीला सुन्दरी सौम्या मातङ्गी कमलात्मिका ॥ ८॥

निशुम्भनाशिनी शुम्भनाशिनी चण्डनाशिनी ।
धूम्रलोचनसंहारी महिषासुरमर्दिनी ॥ ९॥

उमा गौरी कराला च कामिनी विश्वमोहिनी ।
जगदीशप्रिया जन्मनाशिनी भवनाशिनी ॥ १०॥

घोरवक्त्रा ललज्जिह्वा अट्टहासा दिगम्बरा ।
भारती स्वरगता देवी भोगदा मोक्षदायिनी ॥ ११॥

इत्येवं शतनामानि कथितानि वरानने ।
नामस्मरणमात्रेण जीवन्मुक्तो न संशयः ।
पठित्वा शतनामानि मन्त्रसिद्धिं लभेत् ध्रुवम् ॥ १२॥

इति मन्त्रसिद्धिप्रदमहादुर्गाशतनामस्तोत्रं सम्पूर्णम् ।

मुण्डमालातन्त्रान्तर्गतम् चतुर्थे पटले श्लोकाः १०-२४

*Mantrasiddhiprada Mahadurga ShatanAma Stotram*

pdf was typeset on January 14, 2021

Please send corrections to *sanskrit@cheerful.com*